प्रेतत्वादिजनककर्म्माणि यथा,—
“हरिर्य्यैर्ङ्गति नार्च्चौ ये गोविन्दं नार्च्चयन्ति ये।
नमन्ति नात्मविद्यांश्च सुतीर्थविमुखाश्च ये॥
सुवर्णं पक्वतामूलं रत्नमन्नं फलं जलम्।
आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वे सुव्रतदारकाः॥
ब्रह्मस्वञ्च स्त्रीधनानि लोभादेव हरन्ति ये।
बलेन छद्मना वापि धूर्त्ताश्च परवञ्चकाः॥
नास्तिकाः कुहकाश्चौरा ये चान्ये वकवृत्तयः।
बालहृद्धातुरस्त्रीषु निर्द्दयाः सत्यवर्ज्जिताः॥
अग्निदा गरदा ये च ये चान्ये कूटसाक्षिणः।
अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः॥
आचारवर्ज्जनस्यक्ता धर्म्मादिधर्म्मवर्ज्जिताः।
देवीयदेवद्रुमस्त्रीयद्रव्यादिसेविनः॥
सर्व्वदा मादकद्रव्यपानभक्ता हरिद्विषः।
देवतोच्छिष्टपतितशूद्राद्यन्नभोजिनः॥
असत्कर्म्मरता नित्यं सर्व्वपातकपापिनः।
पापकर्म्मपरश्चाः पुरोधोवृत्तिजीविनः॥
मित्रभार्य्याकुमारीस्वदाराख्यागिनश्च ये।
ये वदन्ति सुव्याख्या नास्तिका धर्म्मदूषकाः॥
त्यजन्ति स्वामिनं युद्धे त्यजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः॥
मद्याद्येष्वेषु सर्व्वेषु प्रतिग्रहरताश्च ये।
परद्रोहरता ये च तथा ये प्राणिहिंसकाः॥
परापवादिनः पापा देवतागुरुनिन्दकाः।
कुप्रतिग्राहिणः सर्व्वे सम्भवन्ति पुनः पुनः॥
प्रेतराक्षसपैशाच्यतिर्य्यगूदृक्षयोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च॥”
इति पाद्मोत्तरखण्डे १८ अध्यायः॥*॥

अथप्रेतोपाख्यानं यथा,—

ब्राह्मण उवाच।

“प्रेतानां नाम जातीनां युष्माकं सम्भवः कथम्।
किन्नु कारणमुद्दिश्य यूयमीदृग्गनामकाः॥

प्रेता ऊचुः।

अस्माकं स्वादु सदा भुक्ता दत्तं पर्य्युषितं सदा।
एतत्कारणमुद्दिश्य नाम पर्य्युषितं मम॥१॥
क्षुधिता बहवोऽनेन निप्रादा याचकाः स्थिताः।
एतत् कारणमुद्दिश्य सूचीमुखमिमं विदुः॥२॥
शीघ्रं गच्छति विप्राय याचितः क्षुधितेन वै।
पश्चाद्दृष्ट्वा द्विजः शिघ्रमेव शीघ्रक उच्यते॥३॥
एकोऽपि यदा भुङ्क्ते स्वादु द्विजभयेन हि।
हित्वाय कुत्सितं दत्त्वा एव रोधक उच्यते॥४॥
मौनेनापि स्थितो नित्यं याचितो विलिखेन्महीम्।
अस्माकमपि पापिष्ठो लेखको नाम एव वै॥५॥
उद्वेगे लेखको याति रोधकः पार्श्वतःशिराः।
शीघ्रकः पङ्गुतां प्राप्तः स्वधी सूचीमुखोऽभवत्॥”

प्रेतानामाहारो यथा,—

द्विज उवाच।

“ये जीवा भुवि तिष्ठन्ति सर्व्वे आहारमूलकाः।
युष्माकमपि आहारं श्रोतुमिच्छामि तत्त्वतः॥

प्रेता ऊचुः।

२८॥ आहारमस्माकं सर्व्वसत्वविगर्हितम्।
श्लेष्ममूत्रपुरीषैश्च योषिन्मलैस्तु मलेन च॥
गृहाणि त्यक्तशौचानि प्रेता भुञ्जन्ति तत्र वै॥
स्त्रीभिर्भग्नानि जीर्णानि संकीर्णापहृतानि च।
मलेनातिजुगुप्सानि प्रेता भुञ्जन्ति तत्र वै॥
भयलज्जाविहीनानि पतितैः सेवितानि च।
अन्योन्यदस्युयुक्तानि प्रेता भुञ्जन्ति तत्र वै॥
कलहान्वितशोकानि त्यक्तशोभानि मज्जनैः।
सवर्च्चस्कानि भाण्डानि प्रेता भुञ्जन्ति तत्र वै॥
बलिमन्त्रविहीनानि द्विजाडम्बरानि यानि तु।
नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै॥
गुरवो नैव पूज्यन्ते स्त्रीजितानि सदानि च।
सक्लेशान्यपवित्राणि प्रेता भुञ्जन्ति तत्र वै॥
भुञ्जन्ति भिन्नभाण्डेषु मर्य्यादारहितेषु च।
अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते॥
सकेशमाक्षिकोच्छिष्टं पूतिपर्य्युषितं तथा।
सक्रोधञ्च सशोकञ्च तत्र प्रेतेषु भोजनम्॥
सनग्नं भोजनं यच्च नोत्तरीयं पदासनम्।
लोमीषं सासुरीकञ्चं तत्र प्रेतेषु भोजनम्॥
अर्द्धग्रासं मद्यग्रासं नीतृप्तिप्रं पतितं तथा।
दुर्भुक्तं गोष्ठिकञ्चैव तत्र प्रेतेषु भोजनम्॥
सौतिकं मृतकाञ्चैव रजसं कलुषीकृतम्।
निर्द्दोषं क्रमिवक्तायै यद्भुक्तं प्रेतिकन्तु तत्॥
एतत्ते कथितं सर्व्वं यत् प्रेतेष्वेव भोजनम्।
निर्व्विसाः प्रेतजाता वै पृच्छामस्त्वां द्विजो-
त्तम!॥”*॥

प्रेतत्वाभावकारणं यथा,—
“न प्रेतो जायते येन येन चैवेह जायते।
एतत् सर्व्वं समासेन प्रब्रूहि वदतां वर!॥

ब्राह्मण उवाच।

एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम्।
व्रतेष्वप्युषितो यस्तु न प्रेतो जायते नरः॥
मिष्टान्नपानदाताच सततं श्रद्धयान्वितः।
देवपूजाकरो नित्यं न प्रेतो जायते नरः॥
चिरश्चिरैकपक्षाग्निर्निरग्निर्यापुयाजकः।
सर्व्वभूतदयापन्नो न प्रेतो जायते नरः॥
तुल्यमानापमानश्च तुल्यः काञ्चनलोष्टयोः।
तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः॥
देवतातिथिपूजासु गुरुत्वासिषु निरतः।
वेदशास्त्ररतो नित्यं न प्रेतो जायते नरः॥
जितक्रोधो मदैश्वर्य्यतृष्णासङ्गविवर्ज्जितः।
क्षमाक्रोधसुशीलश्च न प्रेतो जायते नरः॥
देवतातिथिपूजासु पर्व्वतांश्च नदीस्तथा।
यस्मिन्देवालयांश्चैव न प्रेतो जायते नरः॥”*॥

प्रेतत्वकारणं यथा,—
“शूद्रान्नं यो द्विजो भुङ्क्ते यः कामति द्विजो-
त्तमम्।
हन्तिहा द्विजदेवेषु स प्रेतो जायते नरः॥
मातरं पितरं वृद्धं भ्रातिं साधुजनं तथा।
लोभात् त्यजति यः चैर्ष्यं स प्रेतो जायते नरः॥
अयाज्ययाजकश्चैव याज्यञ्च परिवर्ज्जयेत्।
शूद्राणुग्रहकर्त्ता च स प्रेतो जायते नरः॥
कुज्योतिषि कुविद्यस्तु कुजनेषु कुदेशकः।
शूद्रसेवाकरो राज्ञां स प्रेतो जायते नरः॥
सेवकाधापहृतो यः सेवकस्वपरिग्रहः।
तावुभावपि जायेते प्रेतौ कालान्नकिंप्रदः॥
द्विजाशुमन्त्रितो भुङ्क्ते शूद्रान्नं वा द्विजस्य तु।
शूद्रेणैव द्विजः प्रेतो निरयानुपगच्छति॥
गीतवाद्यरतो नित्यं मद्यपस्त्रीनिषेवणात्।
द्यूतमांसप्रियो यस्तु स प्रेतो जायते नरः॥
वृथारेतो वृथामांसो वृथावादी वृथामतिः।
निन्दको द्विजदेवानां स प्रेतो जायते नरः॥
वृद्धं बालं गुरुं विप्रं योऽवमन्य भुनक्ति वै।
कन्यां ददाति शुल्केन स प्रेतो जायते नरः।
न्यासापहर्त्ता मित्रभुक् परपाकरतस्तथा।
विश्वस्तघाती कूटश्च स प्रेतो जायते नरः॥
निर्द्दोषान् सुहृदो नारीस्त्यजेत् कालान्न
पाति यः।
धनमीहेत यस्तेषां स प्रेतो जायते नरः॥
हस्त्यश्वरथयानानि न्यतशय्यासनादि यः।
कृष्णाजिनञ्च गृह्णाति चनापत्सु गतो द्विजः॥
तथोभयमुखीं कालं सशैलां मेदिनीं द्विजः।
कुरुक्षेत्रस्य यद्दानं चाण्डालात् पतितात्तथा।
मासिकेऽपि नवश्राद्धे भुञ्जन् प्रेतान्न मुच्यते॥
ब्रह्महा गोवधी स्तेयी सुरापो गुरुतल्पगः।
भूमिकन्यापहर्त्ता यः स प्रेतो जायते नरः॥
कालासङ्करकन्नित्यं वर्णसङ्करकृत्तथा।
योनिसङ्करकश्चापि स प्रेतो जायते नरः॥
विक्रीणाति विषं शस्त्रं तिलानां लवणस्य तु।
गवां केशरिणां मोहात् विक्रयात् प्रेततां
व्रजेत्॥
कूटमाप्ये च तौल्येन क्रयं क्रीणाति विक्रयात्।
मद्यतक्रपयोदध्नां स प्रेतो जायते नरः॥
शौरत्नो मदाभाने तु न्ययथामनुधावति।
नित्यनैमित्तिकेऽदाता स प्रेतो जायते नरः॥”
इत्यग्निपुराणम्॥*॥

मनुष्याणां आतिवाहिकदेहानन्तरं प्रेतदेहो भवति। यथा, विष्णुधर्म्मोत्तरे।
“तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम्।
आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!॥
केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्।
प्रेतपिण्डैस्ततो दत्तैर्देहमाप्नोति भार्गव!॥
भोगदेहमिति प्रोक्तं क्रमादेव न संशयः।
प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्॥
श्मशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते।
तत्रास्य यातना घोराः शीतवातातपोद्भवाः॥
ततः सपिण्डीकरणे बान्धवैः स कृते नरः।
पूर्णे संवत्सरे देहमतोऽन्यं प्रतिपद्यते॥
ततः स नरके याति स्वर्गे वा स्वेन कर्म्मणा॥”
इति शुद्धितत्त्वम्॥

प्रेतकार्य्यं, क्ली, (प्रेताय प्रेतस्य वा कार्य्यम्।) मृतस्य दाहादिसपिण्डीकरणान्तं कर्म्म। यथा,
“असमा प्रेतकार्य्याणि प्रेतस्य धनहारकः।
वर्णानां वदये प्रोक्तं तद्व्रतं नियतश्चरेत्॥”
इति दायतत्त्वम्॥
(यथाच महाभारते। १। १०२। ६५।